# Shri Durga Sahasranama Stotra 2

# श्रीदुर्गासहस्रनामस्तोत्रम् २

## Document Information

Text title : durgAsahasranAmastotram 2 from TantrarAjatantra

File name : durgAsahasranAmastotramtantrarAja.itx

Category : sahasranAma, devii, durgA, devI

Location : doc_devii

Transliterated by : DPD, Alex

Proofread by : DPD, NA, PSA Easwaran

Description-comments : See corresponding nAmAvaliH

Latest update : December 25, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2020

*sanskritdocuments.org*

# श्रीदुर्गासहस्रनामस्तोत्रम् २

तन्त्रराजतन्त्रे

पूर्वपीठिका

श्रीशिव उवाच -

शृणु देवि प्रवक्ष्यामि दुर्गानामसहस्रकम् ।
यत्प्रसादान्महादेवि चतुर्वर्गफलं लभेत् ॥ १॥

पठनं श्रवणं चास्य सर्वाशापरिपूरकम् ।
धनपुत्रप्रदं चैव बालानां शान्तिकारकम् ॥ २॥

उग्ररोगप्रशमनं ग्रहदोषविनाशनम् ।
अकालमृत्युहरणं वाणिज्ये विजयप्रदम् ॥ ३॥

विवादे दुर्गमे युद्धे नौकायां शत्रुसङ्कटे ।
राजद्वारे महाऽरण्ये सर्वत्र विजयप्रदम् ॥ ४॥

॥ विनियोगः ॥

ॐ अस्य श्रीदुर्गासहस्रनाममालामन्त्रस्य श्रीनारद ऋषिः ।
गायत्री छन्दः । श्रीदुर्गा देवता । दुं बीजम् । ह्रीं शक्तिः ।
ॐ कीलकम् । श्रीदुर्गाप्रीत्यर्थं श्रीदुर्गासहस्रनामपाठे विनियोगः ॥

ऋष्यादि न्यासः ।
श्रीनारदऋषये नमः शिरसि । गायत्रीछन्दसे नमः मुखे ।
श्रीदुर्गादेवतायै नमः हृदये । दुं बीजाय नमः गुह्ये ।
ह्रीं शक्तये नमः पादयोः । ॐ कीलकाय नमः नाभौ ।
श्रीदुर्गाप्रीत्यर्थं श्रीदुर्गासहस्रनामपाठे विनियोगाय नमः सर्वाङ्गे ॥

करन्यासः ।
ह्रां ॐ ह्रीं दुं दुर्गायै अङ्गुष्ठाभ्यां नमः ।
ह्रीं ॐ ह्रीं दुं दुर्गायै तर्जनीभ्यां स्वाहा ।

ह्रूं ॐ ह्रीं दुं दुर्गायै मध्यमाभ्यां वषट् ।
ह्रैं ॐ ह्रीं दुं दुर्गायै अनामिकाभ्यां हुम् ।
ह्रौं ॐ ह्रीं दुं दुर्गायै कनिष्ठिकाभ्यां वौषट् ।
ह्रः ॐ ह्रीं दुं दुर्गायै करतलकरपृष्ठाभ्यां फट् ॥

अङ्गन्यासः ।
ह्रां ॐ ह्रीं दुं दुर्गायै हृदयाय नमः ।
ह्रीं ॐ ह्रीं दुं दुर्गायै शिरसे स्वाहा ।
ह्रूं ॐ ह्रीं दुं दुर्गायै शिखायै वषट् ।
ह्रैं ॐ ह्रीं दुं दुर्गायै कवचाय हुम् ।
ह्रौं ॐ ह्रीं दुं दुर्गायै नेत्रत्रयाय वौषट् ।
ह्रः ॐ ह्रीं दुं दुर्गायै अस्त्राय फट् ॥

॥ अथ ध्यानम् ॥

सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः
शङ्खचक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता ।
आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीक्वणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु वो रत्नोल्लसत्कुण्डला ॥

॥ मानसपूजनम् ॥

लं पृथिव्यात्मकं गन्धं कल्पयामि ।
हं आकाशात्मकं पुष्पं समर्पयामि ।
यं वाय्व्यात्मकं धूपमाघ्रापयामि ।
रं वह्न्यात्मकं दीपं दर्शयामि ।
वं अमृतात्मकं नैवेद्यं निवेदयामि ।
सं सर्वात्मकं ताम्बूलं निवेदयामि ।

॥ मूल पाठम् ॥

अथ सहस्रनामस्तोत्रम् ।
ॐ श्रीदुर्गा दुर्गतिहरा परिपूर्णा परात्परा ।
सर्वोपाधिविनिर्मुक्ता भवभारविनाशिनी ॥ १॥

कार्यकारणनिर्मुक्ता लीलाविग्रहधारिणी ।
सर्वशृङ्गारशोभाढ्या सर्वायुधसमन्विता ॥ २॥

सूर्यकोटिसहस्राभा चन्द्रकोटिनिभानना ।
गणेशकोटिलावण्या विष्णुकोट्यरिमर्दिनी ॥ ३॥

दावाग्निकोटिनलिनी रुद्रकोट्युग्ररूपिणी ।
समुद्रकोटिगम्भीरा वायुकोटिमहाबला ॥ ४॥

आकाशकोटिविस्तारा यमकोटिभयङ्करी ।
मेरुकोटिसमुछ्रया गणकोटिसमृद्धिदा ॥ ५॥

नमस्या प्रथमा पूज्या सकला अखिलाम्बिका ।
महाप्रकृति सर्वात्मा भुक्तिमुक्तिप्रदायिनी ॥ ६॥

अजन्या जननी जन्या महावृषभवाहिनी ।
कर्दमी काश्यपी पद्मा सर्वतीर्थनिवासिनी ॥ ७॥

भीमेश्वरी भीमनादा भवसागरतारिणी ।
सर्वदेवशिरोरत्ननिघृष्टचरणाम्बुजा ॥ ८॥

स्मरतां सर्वपापघ्नी सर्वकारणकारणा ।
सर्वार्थसाधिका माता सर्वमङ्गलमङ्गला ॥ ९॥

पृच्छा पृश्नी महाज्योतिररण्या वनदेवता ।
भीतिर्भूतिर्मतिः शक्तिस्तुष्टिः पुष्टिरुषा धृतिः ॥ १०॥

उत्तानहस्ता सम्भूतिः वृक्षवल्कलधारिणी ।
महाप्रभा महाचण्डी दीप्तास्या उग्रलोचना ॥ ११॥

महामेघप्रभा विद्या मुक्तकेशी दिगम्बरी ।
हसन्मुखी साट्टहासा लोलजिह्वा महेश्वरी ॥ १२॥

मुण्डाली अभया दक्षा महाभीमा वरोद्यता ।
खड्गमुण्डधरा मुक्तिः कुमुदाऽज्ञाननाशिनी ॥ १३॥

अम्बालिका महावीर्या शारदा कनकेश्वरी ।
परमात्मा परा क्षिप्ता शूलिनी परमेश्वरी ॥ १४॥

महाकालसमासक्ता शिवाशतनिनादिनी ।
घोराङ्गी मुण्डमुकुटा श्मशानास्थिकृतासना ॥ १५॥

महाश्मशाननिलया मणिमण्डपमध्यगा ।
पानपात्रधृता खर्वा पन्नगी परदेवता ॥ १६॥

सुगन्धा तारिणी तारा भवानी वनवासिनी ।
लम्बोदरी महादीर्घा जटिनी चन्द्रशेखरा ॥ १७॥

पराऽम्बा परमाराध्या परेशी ब्रह्मरूपिणी ।
देवसेना विश्वगर्भा अग्निजिह्वा चतुर्भुजा ॥ १८॥

महादंष्ट्रा महारात्रिः नीला नीलसरस्वती ।
दक्षजा भारती रम्भा महामङ्गलचण्डिका ॥ १९॥

रुद्रजा कौशिकी पूता यमघण्टा महाबला ।
कादम्बिनी चिदानन्दा क्षेत्रस्था क्षेत्रकर्षिणी ॥ २०॥

पञ्चप्रेतसमारुढा ललिता त्वरिता सती ।
भैरवी रूपसम्पन्ना मदनादलनाशिनी ॥ २१॥

जातापहारिणी वार्ता मातृका अष्टमातृका ।
अनङ्गमेखला षष्ठी हृल्लेखा पर्वतात्मजा ॥ २२॥

वसुन्धरा धरा धारा विधात्री विन्ध्यवासिनी ।
अयोध्या मथुरा काञ्ची महैश्वर्या महोदरी ॥ २३॥

कोमला मानदा भव्या मत्स्योदरी महालया ।
पाशाङ्कुशधनुर्बाणा लावण्याम्बुधिचन्द्रिका ॥ २४॥

रक्तवासा रक्तलिप्ता रक्तगन्धविनोदिनी ।
दुर्लभा सुलभा मत्स्या माधवी मण्डलेश्वरी ॥ २५॥

पार्वती अमरी अम्बा महापातकनाशिनी ।
नित्यतृप्ता निराभासा अकुला रोगनाशिनी ॥ २६॥

कनकेशी पञ्चरूपा नूपुरा नीलवाहिनी ।
जगन्मयी जगद्धात्री अरुणा वारुणी जया ॥ २७॥

हिङ्गुला कोटरा सेना कालिन्दी सुरपूजिता ।
रामेश्वरी देवगर्भा त्रिस्रोता अखिलेश्वरी ॥ २८॥

ब्रह्माणी वैष्णवी रौद्री महाकालमनोरमा ।
गारुडी विमला हंसी योगिनी रतिसुन्दरी ॥ २९॥

कपालिनी महाचण्डा विप्रचित्ता कुमारिका ।

ईशानी ईश्वरी ब्राह्मी माहेशी विश्वमोहिनी ॥ ३०॥

एकवीरा कुलानन्दा कालपुत्री सदाशिवा ।
शाकम्भरी नीलवर्णा महिषासुरमर्दिनी ॥ ३१॥

कामदा कामिनी कुल्ला कुरुकुल्ला विरोधिनी ।
उग्रा उग्रप्रभा दीप्ता प्रभा दंष्ट्रा मनोजवा ॥ ३२॥

कल्पवृक्षतलासीना श्रीनाथगुरुपादुका ।
अव्याजकरुणामूर्तिरानन्दघनविग्रहा ॥ ३३॥

विश्वरूपा विश्वमाता वज्रिणी वज्रविग्रहा ।
अनघा शाङ्करी दिव्या पवित्रा सर्वसाक्षिणी ॥ ३४॥

धनुर्बाणगदाहस्ता आयुधा आयुधान्विता ।
लोकोत्तरा पद्मनेत्रा योगमाया जटेश्वरी ॥ ३५॥

अनुच्चार्या त्रिधा दृप्ता चिन्मयी शिवसुन्दरी ।
विश्वेश्वरी महामेधा उच्छिष्टा विस्फुलिङ्गिनी ॥ ३६॥

चिदम्बरी चिदाकारा अणिमा नीलकुन्तला ।
दैत्येश्वरी देवमाता महादेवी कुशप्रिया ॥ ३७॥

सर्वदेवमयी पुष्टा भूष्या भूतपतिप्रिया ।
महाकिरातिनी साध्या धर्मज्ञा भीषणानना ॥ ३८॥

उग्रचण्डा श्रीचाण्डाली मोहिनी चण्डविक्रमा ।
चिन्तनीया महादीर्घा अमृताऽमृतबान्धवी ॥ ३९॥

पिनाकधारिणी शिप्रा धात्री त्रिजगदीश्वरी ।
रक्तपा रुधिराक्ताङ्गी रक्तखर्परधारिणी ॥ ४०॥

त्रिपुरा त्रिकूटा नित्या श्रीनित्या भुवनेश्वरी ।
हव्या कव्या लोकगतिर्गायत्री परमा गतिः ॥ ४१॥

विश्वधात्री लोकमाता पञ्चमी पितृतृप्तिदा ।
कामेश्वरी कामरूपा कामबीजा कलात्मिका ॥ ४२॥

ताटङ्कशोभिनी वन्द्या नित्यक्लिन्ना कुलेश्वरी ।
भुवनेशी महाराज्ञी अक्षरा अक्षरात्मिका ॥ ४३॥

अनादिबोधा सर्वज्ञा सर्वा सर्वतरा शुभा ।
इच्छाज्ञानक्रियाशक्तिः सर्वाढ्या शर्वपूजिता ॥ ४४॥

श्रीमहासुन्दरी रम्या राज्ञी श्रीपरमाम्बिका ।
राजराजेश्वरी भद्रा श्रीमत्त्रिपुरसुन्दरी ॥ ४५॥

त्रिसन्ध्या इन्दिरा ऐन्द्री अजिता अपराजिता ।
भेरुण्डा दण्डिनी घोरा इन्द्राणी च तपस्विनी ॥ ४६॥

शैलपुत्री चण्डधण्टा कूष्माण्डा ब्रह्मचारिणी ।
कात्यायनी स्कन्दमाता कालरात्रिः शुभङ्करी ॥ ४७॥

महागौरा सिद्धिदात्री नवदुर्गा नभःस्थिता ।
सुनन्दा नन्दिनी कृत्या महाभागा महोज्ज्वला ॥ ४८॥

महाविद्या ब्रह्मविद्या दामिनी तापहारिणी ।
उत्थिता उत्पला बाध्या प्रमोदा शुभदोत्तमा ॥ ४९॥

अतुल्या अमूला पूर्णा हंसारूढा हरिप्रिया ।
सुलोचना विरूपाक्षी विद्युद्गौरी महार्हणा ॥ ५०॥

काकध्वजा शिवाराध्या शूर्पहस्ता कृशाङ्गिनी ।
शुभ्रकेशी कोटराक्षी विधवा पतिघातिनी ॥ ५१॥

सर्वसिद्धिकरी दुष्टा क्षुधार्ता शिवभक्षिणी ।
वर्गात्मिका त्रिकालज्ञा त्रिवर्गा त्रिदशार्चिता ॥ ५२॥

श्रीमती भोगिनी काशी अविमुक्ता गयेश्वरी ।
सिद्धाम्बिका सुवर्णाक्षी कोलाम्बा सिद्धयोगिनी ॥ ५३॥

देवज्योतिस्समुद्भूता देवज्योतिस्स्वरूपिणी ।
अच्छेद्या अद्भुता तीव्रा व्रतस्था व्रतचारिणी ॥ ५४॥

सिद्धिदा धूमिनी तन्वी भ्रामरी रक्तदन्तिका ।
स्वस्तिका गगना वाणी जाह्नवी भवभामिनी ॥ ५५॥

पतिव्रता महामोहा मुकुटा मुकुटेश्वरी ।
गुह्येश्वरी गुह्यमाता चण्डिका गुह्यकालिका ॥ ५६॥

प्रसूतिराकूतिश्चित्ता चिन्ता देवाहुतिस्त्रयी ।
अनुमतिः कुहू राका सिनीवाली त्विषा रसा ॥ ५७॥

सुवर्चा वर्चला शार्वी विकेशा कृष्णपिङ्गला ।
स्वप्नावती चित्रलेखा अन्नपूर्णा चतुष्टया ॥ ५८॥

पुण्यलभ्या वरारोहा श्यामाङ्गी शशिशेखरा ।
हरणी गौतमी मेना यादवा पूर्णिमा उमा ॥ ५९॥

त्रिखण्डा त्रिमुण्डा मान्या भूतमाता भवेश्वरी ।
भोगदा स्वर्गदा मोक्षा सुभगा यज्ञरूपिणी ॥ ६०॥

अन्नदा सर्वसम्पत्तिः सङ्कटा सम्पदा स्मृतिः ।
वैदूर्यमुकुटा मेधा सर्वविद्येश्वरेश्वरी ॥ ६१॥

ब्रह्मानन्दा ब्रह्मदात्री मृडानी कैटभेश्वरी ।
अरुन्धती अक्षमाला अस्थिरा ग्राम्यदेवता ॥ ६२॥

वर्णेश्वरी वर्णमाता चिन्तापूर्णी विलक्षणा ।
त्रीक्षणा मङ्गला काली वैराटी पद्ममालिनी ॥ ६३॥

अमला विकटा मुख्या अविज्ञेया स्वयम्भुवा ।
ऊर्जा तारावती वेला मानवी च चतुःस्तनी ॥ ६४॥

चतुर्नेत्रा चतुर्हस्ता चतुर्दन्ता चतुर्मुखी ।
शतरूपा बहुरूपा अरूपा विश्वतोमुखी ॥ ६५॥

गरिष्ठा गुर्विणी गुर्वी व्याप्या भौमी च भाविनी ।
अजाता सुजाता व्यक्ता अचला अक्षया क्षमा ॥ ६६॥

मारिषा धर्मिणी हर्षा भूतधात्री च धेनुका ।
अयोनिजा अजा साध्वी शची क्षेमा क्षयङ्करी ॥ ६७॥

बुद्धिर्लज्जा महासिद्धिः शाक्री शान्तिः क्रियावती ।
प्रज्ञा प्रीतिः श्रुतिः श्रद्धा स्वाहा कान्तिर्वपुःस्वधा ॥ ६८॥

उन्नतिः सन्नतिः ख्यातिः शुद्धिः स्थितिर्मनस्विनी ।
उद्यमा वीरिणी क्षान्तिर्मार्कण्डेयी त्रयोदशी ॥ ६९॥

प्रसिद्धा प्रतिष्ठा व्याप्ता अनसूयाऽऽकृतिर्यमा ।
महाधीरा महावीरा भुजङ्गी वलयाकृतिः ॥ ७०॥

हरसिद्धा सिद्धकाली सिद्धाम्बा सिद्धपूजिता ।

परानन्दा पराप्रीतिः परातुष्टिः परेश्वरी ॥ ७१॥

वक्रेश्वरी चतुर्वक्त्रा अनाथा शिवसाधिका ।
नारायणी नादरूपा नादिनी नर्तकी नटी ॥ ७२॥

सर्वप्रदा पञ्चवक्त्रा कामिला कामिका शिवा ।
दुर्गमा दुरतिक्रान्ता दुर्ध्येया दुष्परिग्रहा ॥ ७३॥

दुर्जया दानवी देवी दैत्यघ्नी दैत्यतापिनी ।
ऊर्जस्वती महाबुद्धिः रटन्ती सिद्धदेवता ॥ ७४॥

कीर्तिदा प्रवरा लभ्या शरण्या शिवशोभना ।
सन्मार्गदायिनी शुद्धा सुरसा रक्तचण्डिका ॥ ७५॥

सुरूपा द्रविणा रक्ता विरक्ता ब्रह्मवादिनी ।
अगुणा निर्गुणा गुण्या त्रिगुणा त्रिगुणात्मिका ॥ ७६॥

उड्डियाना पूर्णशैला कामाख्या च जलन्धरी ।
श्मशानभैरवी कालभैरवी कुलभैरवी ॥ ७७॥

त्रिपुराभैरवीदेवी भैरवी वीरभैरवी ।
श्रीमहाभैरवीदेवी सुखदाऽऽनन्दभैरवी ॥ ७८॥

मुक्तिदाभैरवीदेवी ज्ञानदाऽऽनन्दभैरवी ।
दाक्षायणी दक्षयज्ञनाशिनी नगनन्दिनी ॥ ७९॥

राजपुत्री राजपूज्या भक्तिवश्या सनातनी ।
अच्युता चर्चिका माया षोडशी सुरसुन्दरी ॥ ८०॥

चक्रेशी चक्रिणी चक्रा चक्रराजनिवासिनी ।
नायिका यक्षिणी बोधा बोधिनी मुण्डकेश्वरी ॥ ८१॥

बीजरूपा चन्द्रभागा कुमारी कपिलेश्वरी ।
वृद्धाऽतिवृद्धा रसिका रसना पाटलेश्वरी ॥ ८२॥

माहेश्वरी महाऽऽनन्दा प्रबला अबला बला ।
व्याघ्राम्बरी महेशानी शर्वाणी तामसी दया ॥ ८३॥

धरणी धारिणी तृष्णा महामारी दुरत्यया ।
रङ्गिनी टङ्किनी लीला महावेगा मखेश्वरी ॥ ८४॥

जयदा जित्वरा जेत्री जयश्री जयशालिनी ।
नर्मदा यमुना गङ्गा वेन्वा वेणी दृषद्वती ॥ ८५॥

दशार्णा अलका सीता तुङ्गभद्रा तरङ्गिणी ।
मदोत्कटा मयूराक्षी मीनाक्षी मणिकुण्डला ॥ ८६ ॥

सुमहा महतां सेव्या मायूरी नारसिंहिका ।
बगला स्तम्भिनी पीता पूजिता शिवनायिका ॥ ८७॥

वेदवेद्या महारौद्री वेदबाह्या गतिप्रदा ।
सर्वशास्त्रमयी आर्या अवाङ्मनसगोचरा ॥ ८८॥

अग्निज्वाला महाज्वाला प्रज्वाला दीप्तजिह्विका ।
रञ्जनी रमणी रुद्रा रमणीया प्रभञ्जनी ॥ ८९॥

वरिष्ठा विशिष्टा शिष्टा श्रेष्ठा निष्ठा कृपावती ।
ऊर्ध्वमुखी विशालास्या रुद्रभार्या भयङ्करी ॥ ९०॥

सिंहपृष्ठसमासीना शिवताण्डवदर्शिनी ।
हैमवती पद्मगन्धा गन्धेश्वरी भवप्रिया ॥ ९१॥

अणुरूपा महासूक्ष्मा प्रत्यक्षा च मखान्तका ।
सर्वविद्या रक्तनेत्रा बहुनेत्रा अनेत्रका ॥ ९२॥

विश्वम्भरा विश्वयोनिः सर्वाकारा सुदर्शना ।
कृष्णाजिनधरा देवी उत्तरा कन्दवासिनी ॥ ९३॥

प्रकृष्टा प्रहृष्टा हृष्टा चन्द्रसूर्याग्निभक्षिणी ।
विश्वेदेवी महामुण्डा पञ्चमुण्डाधिवासिनी ॥ ९४॥

प्रसादसुमुखी गूढा सुमुखा सुमुखेश्वरी ।
तत्पदा सत्पदाऽत्यर्था प्रभावती दयावती ॥ ९५॥

चण्डदुर्गा चण्डीदेवी वनदुर्गा वनेश्वरी ।
ध्रुवेश्वरी ध्रुवा ध्रौव्या ध्रुवाराध्या ध्रुवागतिः ॥ ९६॥

सच्चिदा सच्चिदानन्दा आपोमयी महासुखा ।
वागीशी वाग्भवाऽऽकण्ठवासिनी वह्निसुन्दरी ॥ ९७॥

गणनाथप्रिया ज्ञानगम्या च सर्वलोकगा ।
प्रीतिदा गतिदा प्रेया ध्येया ज्ञेया भयापहा ॥ ९८॥

श्रीकरी श्रीधरी सुश्री श्रीविद्या श्रीविभावनी ।
श्रीयुता श्रीमतां सेव्या श्रीमूर्तिः स्त्रीस्वरूपिणी ॥ ९९॥

अनृता सूनृता सेव्या सर्वलोकोत्तमोत्तमा ।
जयन्ती चन्दना गौरी गर्जिनी गगनोपमा ॥ १००॥

छिन्नमस्ता महामत्ता रेणुका वनशङ्करी ।
ग्राहिका ग्रासिनी देवभूषणा च कपर्दिनी ॥ १०१॥

सुमतिस्तपती स्वस्था हृदिस्था मृगलोचना ।
मनोहरा वज्रदेहा कुलेशी कामचारिणी ॥ १०२॥

रक्ताभा निद्रिता निद्रा रक्ताङ्गी रक्तलोचना ।
कुलचण्डा चण्डवक्त्रा चण्डोग्रा चण्डमालिनी ॥ १०३॥

रक्तचण्डी रुद्रचण्डी चण्डाक्षी चण्डनायिका ।
व्याघ्रास्या शैलजा भाषा वेदार्था रणरङ्गिणी ॥ १०४॥

बिल्वपत्रकृतावासा तरुणी शिवमोहिनी ।
स्थाणुप्रिया करालास्या गुणदा लिङ्गवासिनी ॥ १०५॥

अविद्या ममता अज्ञा अहन्ता अशुभा कृशा ।
महिषघ्नी सुदुष्प्रेक्ष्या तमसा भवमोचनी ॥ १०६॥

पुरूहुता सुप्रतिष्ठा रजनी इष्टदेवता ।
दुःखिनी कातरा क्षीणा गोमती त्र्यम्बकेश्वरा ॥ १०७॥

द्वारावती अप्रमेया अव्ययाऽमितविक्रमा ।
मायावती कृपामूर्तिः द्वारेशी द्वारवासिनी ॥ १०८॥

तेजोमयी विश्वकामा मन्मथा पुष्करावती ।
चित्रादेवी महाकाली कालहन्त्री क्रियामयी ॥ १०९॥

कृपामयी कृपाश्रेष्ठा करुणा करुणामयी ।
सुप्रभा सुव्रता माध्वी मधुघ्नी मुण्डमर्दिनी ॥ ११०॥

उल्लासिनी महोल्लासा स्वामिनी शर्मदायिनी ।
श्रीमाता श्रीमहाराज्ञी प्रसन्ना प्रसन्नानना ॥ १११॥

स्वप्रकाशा महाभूमा ब्रह्मरूपा शिवङ्करी ।

शक्तिदा शान्तिदा कर्मफलदा श्रीप्रदायिनी ॥ ११२॥

प्रियदा धनदा श्रीदा मोक्षदा ज्ञानदा भवा ।
भूमानन्दकरी भूमा प्रसीदश्रुतिगोचरा ॥ ११३॥

रक्तचन्दनसिक्ताङ्गी सिन्दूराङ्कितभालिनी ।
स्वच्छन्दशक्तिर्गहना प्रजावती सुखावहा ॥ ११४॥

योगेश्वरी योगाराध्या महात्रिशूलधारिणी ।
राज्येशी त्रिपुरा सिद्धा महाविभवशालिनी ॥ ११५॥

ह्रीङ्कारी शङ्करी सर्वपङ्कजस्था शतश्रुतिः ।
निस्तारिणी जगन्माता जगदम्बा जगद्धिता ॥ ११६॥

साष्टाङ्गप्रणतिप्रीता भक्तानुग्रहकारिणी ।
शरणागतदीनार्तपरित्राणपरायणा ॥ ११७॥

निराश्रयाश्रया दीनतारिणी भक्तवत्सला ।
दीनाम्बा दीनशरणा भक्तानामभयङ्करी ॥ ११८॥

कृताञ्जलिनमस्कृता स्वयम्भुकुसुमार्चिता ।
कौलतर्पणसंप्रीता स्वयम्भाती विभातिनी ॥ ११९॥

शतशीर्षाऽनन्तशीर्षा श्रीकण्ठार्धशरीरिणी ।
जयध्वनिप्रिया कुलभास्करी कुलसाधिका ॥ १२०॥

अभयवरदहस्ता सर्वानन्दा च संविदा ।
पृथिवीधरा विश्वधरा विश्वगर्भा प्रवर्तिका ॥ १२१॥

विश्वमाया विश्वफाला पद्मनाभप्रसूः प्रजा ।
महीयसी महामूर्तिः सती राज्ञी भयार्तिहा ॥ १२२॥

ब्रह्ममयी विश्वपीठा प्रज्ञाना महिमामयी ।
सिंहारूढा वृषारूढा अश्वारूढा अधीश्वरी ॥ १२३॥

वराभयकरा सर्ववरेण्या विश्वविक्रमा ।
विश्वाश्रया महाभूतिः श्रीप्रज्ञादिसमन्विता ॥ १२४॥

फलश्रुतिः ।
दुर्गानामसहस्राख्यं स्तोत्रं तन्त्रोत्तमोत्तमम् ।
पठनात् श्रवणात्सद्यो नरो मुच्येत सङ्कटात् ॥ १२५॥

अश्वमेधसहस्राणां वाजपेयस्य कोटयः ।
सकृत्पाठेन जायन्ते महामायाप्रसादतः ॥ १२६॥

य इदं पठति नित्यं देव्यागारे कृताञ्जलिः ।
किं तस्य दुर्लभं देवि दिवि भुवि रसातले ॥ १२७॥

स दीर्घायुः सुखी वाग्मी निश्चितं पर्वतात्मजे ।
श्रद्धयाऽश्रद्धया वापि दुर्गानामप्रसादतः ॥ १२८॥

य इदं पठते नित्यं देवीभक्तो मुदान्वितः ।
तस्य शत्रुक्षयं याति तथा शक्रसमो भवेत् ॥ १२९॥

प्रतिनाम समुच्चार्य स्रोतसि यः प्रपूजयेत् ।
षण्मासाभ्यन्तरे देवि निर्धनी धनवान् भवेत् ॥ १३०॥

वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याऽङ्गना ।
अस्य प्रयोगमात्रेण बहुपुत्रवती भवेत् ॥ १३१॥

आरोग्यार्थे शतावृत्तिः पुत्रार्थे ह्येकवत्सरम् ।
दीप्ताग्निसन्निधौ पाठात् अपापो भवति ध्रुवम् ॥ १३२॥

अष्टोत्तरशतेनास्य पुरश्चर्या विधीयते ।
कलौ चतुर्गुणं प्रोक्तं पुरश्चरणसिद्धये ॥ १३३॥

जपाकमलपुष्पं च चम्पकं नागकेशरम् ।
कदम्बं कुसुमं चापि प्रतिनाम्ना समर्चयेत् ॥ १३४॥

प्रणवादिनमोऽन्तेन चतुर्थ्यन्तेन मन्त्रवित् ।
स्रोतसि पूजयित्वा तु उपहारं समर्पयेत् ॥ १३५॥

इच्छाज्ञानक्रियासिद्धिर्निश्चितं गिरिनन्दिनि ।
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ १३६॥

स यास्यति न सन्देहो श्रीदुर्गानामकीर्तनात् ।
भजेद्दुर्गां स्मरेद्दुर्गां जपेद्दुर्गां शिवप्रियाम् ।
तत्क्षणात् शिवमाप्नोति सत्यं सत्यं वरानने ॥ १३७॥

॥ इति तन्त्रराजतन्त्रे श्रीदुर्गासहस्रनामस्तोत्रं सम्पूर्णम् ॥

Proofread by DPD, NA, PSA Easwaran

*Shri Durga Sahasranama Stotra 2*

pdf was typeset on December 25, 2020

Please send corrections to *sanskrit@cheerful.com*